# वाग्वर्धिनी



तिरुपतिराष्ट्रियसंस्कृतविद्यापीठस्य

वाग्वर्धिनीपरिषदः वृत्ति-व्यक्तित्व-परामर्शकेन्द्रस्य च प्रवृत्तकार्यक्रम-वृत्तपत्रिका

स्वर्णजयन्तीमुपलक्ष्य जनवरी - फरवरी - २०११

**Sponsored by CAREER COUNSELLING CELL, R.S.Vidyapeetha,Tirupati-517064,A.P.**


## सम्पादकीयम् ................

**नवीनवर्षस्य समागमोऽयं**
**तनोतु ते मङ्गलमप्रमेयम् ।**
**सर्वेषु कार्येषु सनातनी या**
**दृष्टिः सुराणां सफलीकरोतु ।।**

इति कस्यचित् कवेः भावना सकलजगतः कृते मङ्गलमयीं दृष्टिं प्रसारयति । नूतनता हि सर्वथा पुरातनमाश्रित्य प्रवर्तते। पुरातनं तु संस्कारपरम्परया नूतनतां धत्ते । पुरातनं विहाय नूतनतायाः स्थितिः कुत्र ? अतः वयं यद्यपि सर्वथा नूतनयुगस्य नूतनवस्तुनः नूतनभावनानां वा समुद्घोषणेन आत्मतृप्तिं प्रकटयामः, तथापि तत्र सर्वत्र पुरातनस्य सत्ता नितरां वर्तत एव । अतः नूतनस्य स्वागतीकरणेन वयं परम्परया पुरातनमपि अभिनन्दामः । अस्माकं संस्कृतिः यथा पुरातनी, तथैव अस्माकं भाषाऽपि प्राचीना सती सर्वथा नूतनतायाः प्रचारं करोत्येव । इयं पुरातनी संस्कृतवाणी क्षणं क्षणं रमणीयतामेव प्रतिपादयति । अतः कवयः पण्डिताः विद्वांसश्च सर्वे संस्कृतवाणीमवलम्ब्य अभिनवरचनाद्वारा गौरवमर्जयितुं तत्पराः भवन्ति । अद्यत्वे संस्कृतभाषायाः सुविस्तृतः परिसरः अस्मान् पुरातनतायाः गौरवमार्गं प्रति प्रेरयति । अस्माकं विद्यार्थिषु प्राचीनं गौरवं नवीनरीत्या उद्बोधयितुं **वाग्वर्धिनीपरिषदः** अभिनवः प्रयासः सर्वथा विद्वद्भिरभिनन्दितः । विद्यार्थिनां सर्जन-शक्तेः अभिवर्धनाय नितरां विविधकार्यक्रमाणां निरन्तरं समायोजनेन परिषदियं प्रगतिपथे प्रवर्तते। ऐषमः **स्वर्णजयन्तीमहोत्सव**मभिलक्ष्य विद्यार्थिनां कृते नूतन-सन्देशप्रदानाय विशेषतः संस्कृतविद्यार्थिनां नियुक्तिक्षेत्रे समुचितसूचनाप्रदानाय वाग्वर्धिनीपरिषत्पक्षतः वृत्तिव्यक्तित्वपरामर्शकेन्द्रद्वारा च **'वाग्वर्धिनी'** पत्रिकायाः सम्पादने यथाकालं प्रकाशने च मान्यवरकुलपति-**प्रो. हरेकृष्णशतपथि**महोदयानां सदुपदेशः अस्मान् सम्प्रति द्वितीयसंख्यायाः प्रस्तुतये प्रभुतं प्रेरयतीति तेभ्यः **वाग्वर्धिनी** प्रणतिततिं विनिवेदयति। अवसरेऽस्मिन् सर्वेभ्यः नूतनवर्षस्य शुभाभिनन्दनं च विज्ञापयति ।

*डॉ. सत्यनारायण आचार्यः*

## कुलपतिमहोदयानां दिव्यसन्देशः ..............



**भाषाणां जननी जगन्निवसतां**
**सञ्जीवनी याऽवनी -**
**भूषाणां प्रथमाप्रमानिरुपमा**
**सम्मानसंविभ्रमा ।**
**भावानां भरिते भवे विलसिते**
**सारस्वते भारते**
**सेयं भारतभारती विजयतां**
**विद्यावतां या गतिः ।।** (भारतायनम्, तीर्थवसतिः, श्लोकः - ४२)

अस्माकं राष्ट्रस्य सर्वविधप्रगतये सर्वादौ सद्भावनायाः विकासः नितरामपेक्ष्यते । सद्भावना च दिव्यभाषामाश्रयते। सा च दिव्यभाषा संस्कृतभाषा एव । तदुक्तं- **"संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः"** इत्यादि । अतः देववाण्याः समादरेण समाजे शान्तिः, मैत्री, सद्भावनाश्च सम्भवन्त्येव । सम्प्रति शिक्षाक्षेत्रे सद्भावनायाः विकासाय सर्वेऽपि शिक्षाविदः कृतप्रयत्नाः परिदृश्यन्ते । अस्माकं सौभाग्यं यत् वयं संस्कृतपरिवारसदस्याः देववाण्याः दायादरूपेण सद्भावनायाः गौरवेण गौरवान्विताः । अतः समाजस्य कृते अस्माकं गुरुत्वपूर्णमुत्तरदायित्वं वर्तते। कर्मणा मनसा वाचा च सद्भावनया सर्वे वयं सत्कार्यं विधाय मानवसमाजस्य हितं चिन्तयितुं समर्थाः भवेम । विषयेऽस्मिन् विद्यापीठस्य **वाग्वर्धिनीपरिषत्** विद्यार्थिषु भाषणकौशलस्य विकासेन समं सद्भावनायाः जागरणाय बहुविधान् शैक्षिककार्यक्रमान् समायोजयति । ऐषमः अस्माकं विद्यार्थिनः सफलतया गुजरातराज्यस्य श्रीसोमनाथसंस्कृतविश्वविद्यालये स्वर्णजयन्तीसमारोहे, उत्तरप्रदेशसंस्कृतसंस्थानपक्षतः वाराणसीस्थे श्रीसम्पूर्णानन्द-संस्कृतविश्वविद्यालये समायोजिते अखिलभारतीय-व्याससमारोहे तथा वर्धानगरे शिक्षामण्डलपक्षतः आयोजितासु राष्ट्रियस्पर्धासु साफल्यमधिगतवन्तः सन्ति। अत्र भगवतः दिव्य आशीर्वादः देवभाषाद्वारा एव अस्मान् प्रेरयतीति श्रीवेङ्कटनायकस्य पावनचरणकमलतले सादरमभिवन्दे ।

*प्रो. हरेकृष्ण शतपथी*

## वाग्वर्धिनीपरिषद: सहयोगेन समुद्घाटिता विद्यार्थिवाग्वैखरी



शैक्षिकवर्षेऽस्मिन् विद्यार्थिनां शोधपत्रपठनाय अभिरुचिं वर्धयितुं साहित्यविभागपक्षत: वाग्वर्धिनीपरिषद: सहयोगेन **विद्यार्थिवाग्वैखरी** २१-१२-२०१० दिनाङ्के समुद्घाटिता । तत्र मान्या: कुलपतिपादा: **आचार्या: हरेकृष्णशतपथिमहोदया:** मुख्यातिथित्वेन प्रदीपप्रज्ज्वालनपूर्वकं समुद्घाट्य वाग्वैखर्या: उपासनाद्वारा अस्माकं विद्यावैभवस्य सर्वविधा प्रगति: सहजसाध्या सम्भवतीति समुदघोषयन् । समारोहेऽस्मिन् शैक्षिकसंकायप्रमुखा: **सम्प्राप्तराष्ट्रप्रतिसम्माना: आचार्या: के.रामसूर्यनारायण**महाभागा: अध्यक्षपदमलङ्कृतवन्त: । **प्रो. जी. एस्. आर्. कृष्णमूर्त्ति**महोदय: साहित्यविभागस्य गौरवं शोधसंगोष्ठ्या: उपादेयतां च प्रकटीकृतवान् । विभागे पूर्वं त्रय: अध्यापका: आसन्, सम्प्रति तु कुलपतिमहोदयानां समुद्यमेन प्रप्रथमतया साहित्यानुसन्धानविशेषसहायताकेन्द्रम् (UGC-SAP); तथा क्रमश: अध्यापकानां संख्या ११ संजाता इति स: सहर्षं संसूचितवान् । तत्र संयोजिका **डॉ. सि. ललिताराणी,** विभागाध्यक्ष: वाग्वर्धिनीपरिषद: समायोजकश्च **डा. सत्यनारायण आचार्य:, डॉ. राणीसदाशिवमूर्त्ति:, डॉ. सि. रङ्गनाथ:, डॉ. के. राजगोपालन्, डॉ. जे. वि. चक्रवर्त्ति, डॉ. प्रदीपकुमारवाग्, डॉ. पारमितापण्डा** तथा सर्वे शोधच्छात्रा: समुपस्थाय उद्घाटनसमारोहं सफलीकृतवन्त:। साहित्यविभागपक्षत: शैक्षिकसंकायप्रमुखा: मान्यवरकुलपति**प्रो.हरेकृष्णशतपथि**महोदयानां सम्माननं कृतवन्त: । शोधच्छात्र: **सि. एच्. नागराज:** सभासञ्चालनं कृतवान् । **डॉ. भारतभूषणरथ:** कार्यक्रमस्यान्ते धन्यवादमर्पितवान् ।

## वाग्वर्धिनीपरिषद: आनुकूल्येन विद्यापीठस्य वार्षिकशैक्षिकस्पर्धा: समायोजिता:

प्रतिवर्षमिव ऐषम: विद्यापीठस्य वार्षिकोत्सवस्य कृते विविधा: शैक्षिकस्पर्धा: दिसम्बरमासस्य १४ दिनाङ्कत: २३ दिनाङ्कपर्यन्तं समायोजिता: । वाग्वर्धिनीपरिषद: समायोजक: डॉ. सत्यनारायण आचार्य:, सहसमायोजक: डॉ. एस्. दक्षिणामूर्तिशर्मा तथा कार्यदर्शिसमेता: सदस्या: सहयोगं कृतवन्त: ।

## वाग्वर्धिनी लोकार्पिता




दि.२१.१२.२०१० दिवा १०वादने ओडिशाकेन्द्रीयविश्वविद्यालयस्य कुलपति**प्रो.सुरभिवानार्जि**महोदयाभि: **वाग्वर्धिनी** लोकार्पिता। एतदवसरे **कुलपतिप्रो.हरेकृष्णशतपथि**महोदया: वाग्वर्धिन्या: आभिमुख्यं संस्कृतविद्यार्थिनां कृते सर्वविधं सचेतनताजागरणमिति उद्बोधितवन्त:। स्वतन्त्रसमारोहेऽस्मिन् कुलसचिव:, सङ्कायाध्यक्ष:, वित्ताधिकारी, आचार्या:, कर्मचारिण:, **वाग्वर्धिनीपरिषत्**सदस्याश्च समुपस्थिता: ।

## अद्वैतवेदान्तशास्त्रे एकमासावधि शास्त्रवारिधिपाठ्यक्रमे वाग्वर्धिनीपरिषद: भूमिका




विद्यापीठस्य **पारम्परिकशास्त्रसमुत्कर्षकेन्द्र**द्वारा अद्वैतवेदान्तशास्त्रविषये **वाग्वर्धिनीपरिषद:** साक्षात् सहयोगेन एकमासावधि पाठ्यक्रम: दि.०१-१२-२०१०त: ३०-१२-२०१० पर्यन्तं सञ्चालित:। उद्घाटनसमारोहे विद्यापीठस्य कुलपतय: **आचार्या: हरेकृष्णशतपथि**महाभागा: मुख्यातिथित्वेन समुपस्थाय वेदान्तविद्याया: अधिग्रहणेन मानवीय: व्यवहार: शृङ्खलित: भवेदिति उद्बोधितवन्त: । उद्घाटकत्वेन श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचरा: विख्याता: दार्शनिका: **प्रो. गौराङ्गचरणनायकमहोदया:, प्रो. पि.सीतारामहेब्बर्, प्रो. एम्. एल्. एन्. मूर्त्ति:, प्रो. वि. पुरन्दररेड्डी** तथा विभागस्याचार्या: छात्राश्च समुपस्थिता:। तत्र **डॉ. सुकान्तकुमारसेनापति:, प्रो. साईरामसुब्रह्मण्यशर्मा, डॉ. भगवानसामन्तराय:, डॉ. के.गणपतिभट्ट:, डॉ. के.विश्वनाथ:, डॉ.महाबलेश्वरभट्टप्रमुखा: वेदान्तपरिभाषा**या: अध्यापनं कृतवन्त: । समापनसमारोहे कुलपतय: **आचार्या: हरेकृष्णशतपथि**महाभागा: अध्यक्षरूपेण तथा **आचार्या: समुद्राललक्ष्मणय्यनायुडु**महाभागा: मुख्यातिथित्वेन समुपस्थिता: । अवसरेऽस्मिन् सर्वेभ्य: छात्रेभ्य: प्रमाणपत्राणि प्रदत्तानि । तत्र विभागाध्यक्ष: **प्रो. वि.पुरन्दररेड्डी** सर्वविधस्य कार्यक्रमस्य संयोजनां कृतवान् । वाग्वर्धिनीपरिषत्सदस्या: सर्वेऽपि समुपस्थिता: ।

विद्यापीठस्य स्वर्णजयन्तीमुपलक्ष्य वाग्वर्धिनीपरिषदः आनुकूल्येन

# पञ्चम-अखिलभारतीय-स्वर्णिम-संस्कृतच्छात्रप्रातिभसमारोहः - २०११

विद्यापीठस्य स्वर्णजयन्तीमुपलक्ष्य **पञ्चम-अखिलभारतीय-स्वर्णिम-संस्कृतच्छात्रप्रातिभ-समारोहः-२०११ जनवरीमासस्य २२, २३, २४ तथा २५ दिनाङ्केषु** समायोक्ष्यते। विशेषविवरणार्थं सम्पर्कं कुर्वन्तु- **डॉ.सत्यनारायण आचार्यः** समायोजकः, वाग्वर्धिनीपरिषद्, चलद्वाणी-**09966918130 / डॉ.एस्.दक्षिणामूर्ति शर्मा**, सहसमायोजकः, वाग्वर्धिनीपरिषद् , चलद्वाणी- **098493 83170, अथवा प्रो. ए. गुरुमूर्तिः**, कुलसचिवः, राष्ट्रिय-संस्कृत-विद्यापीठम्, (मानितविश्वविद्यालयः), तिरुपतिः-५१७०६४, दूरभाषा-0877-2286799.



स्वर्णिमगुजरातराष्ट्रियसंस्कृतमहासम्मेलने राष्ट्रियस्पर्धासु भागग्रहणाय मान्यवरकुलपतिप्रो.शतपथिमहोदयैः सह प्रस्तुतः स्पर्धालुगणः, पार्श्वे मार्गदर्शकः डॉ.राणी सदाशिवमूर्तिः



श्रीसोमनाथसंस्कृतविश्वविद्यालये भासमहोत्सवे दि. ०३.१२.२०१० वाग्वर्धिनीपरिषत्पक्षतः विद्यापीठच्छात्रैः मध्यमव्यायोगः अभिनीतः



श्रीसोमनाथसंस्कृतविश्वविद्यालये राष्ट्रियस्पर्धासु दि. ०५.१२.२०१० एकपात्राभिनये विद्यापीठच्छात्रः जि. गोबर्धनः प्रथमपुरस्कारेण पुरस्कृतः

## कुलपतिप्रो. हरेकृष्णशपथिमहोदयानां कृते विश्वकविरवीन्द्रनाथठाकुरपुरस्कारः



कोलकातामहानगरे प्रतिष्ठापितायाः भारतीय-प्राच्य-ऐतिह्यसंस्थायाः (INDIAN INSTITUTE OF ORIENTAL HERITAGE) पक्षतः तिरुपति-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य कुलपतयः **प्रो. हरेकृष्णशतपथि**महोदयाः, शिक्षाक्षेत्रे तदीयं महनीयमवदानमभिलक्ष्य **विश्वकविरवीन्द्रनाथठाकुर-पुरस्कारेण** सभाजिताः भविष्यन्ति । पुरस्कारोऽयं फरवरीमासस्य १२ दिनाङ्के कोलकातामहानगरे समायोजयिष्यमाणे एकस्मिन् स्वतन्त्रमहोत्सवे पश्चिमवङ्गराज्यस्य महामहिमराज्यपालमहोदयैः प्रदास्यते इति संस्थाया अध्यक्षः **प्रो. रामकृष्णशास्त्री** निवेदयति । अत्र प्रकाशनीयं यत् पुरस्कारोऽयं **विश्वकविरवीन्द्रनाथ**स्य **१५०तम जन्मजयन्ती**मभिलक्ष्य प्रदास्यते इति । अवसरेऽस्मिन् **वाग्वर्धिनी** हार्दमभिनन्दति ।

## अखिलभारतीयव्यासमहोत्सवे वाग्वर्धिनीपरिषदः सफलता

उत्तरप्रदेशसंस्कृतसंस्थानपक्षतः वाराणसीनगरे श्रीसंपूर्णानन्दसंस्कृतविश्वविद्यालये दि. १७.१२.१० तः २१.१२.१० पर्यन्तमायोजिते व्यासमहोत्सवे **वाग्वर्धिनीपरिषत्**पक्षतः डॉ. प्रदीपकुमारवागमहोदयस्य मार्गदर्शनेन डि. फणिकृष्णः, लेखरामदन्नाना, सि. बालराजः, एन्. शिवकुमारः, रामदत्तपाण्डेयः, कृष्णानन्ददन्नाना-प्रमुखाश्च छात्राः विविधस्पर्धासु साफल्यमधिगत्य पुरस्कृताः। वाग्वर्धिनी सर्वानभिनन्दति।

## वर्धानगरस्थशिक्षामण्डलस्पर्धासु वाग्वर्धिनीपरिषदः गौरवम्

महाराष्ट्रराज्यस्य वर्धानगरे शिक्षामण्डलपक्षतः ३७तम कमलनयनबजाज-स्मृति-आन्तर्विश्वविद्यालयीय-भाषणस्पर्धासु १०.१२.२०१० तमे दिनाङ्के भागग्रहणं कुर्वन् आचार्यप्रथमवर्षीयः छात्रः **श्रीकृष्णमोहनशर्मा वागवर्धिनीपरिषदः** गौरवं वर्धितवान् । अतः **वाग्वर्धिनी** तमभिनन्दति ।

**वाग्वर्धिनीपरिषदः षष्ठाधिवेशनम्-** ०३-१२-२०१० तमे दिनाङ्के तथा **सप्तमाधिवेशनम् च** १०-१२-२०१० तमे दिनाङ्के परम्परानुसारं सुसम्पन्ने ।

## CAREER COUNSELLING CELL

### नियुक्तिसूचना (EMPLOYMENT NEWS)

**1. N.C.E.R.T., New Delhi,** invites applications for various academic positions Published in The Employment News 11-17 December, 2010. The last date for submission of the application is January 10, 2011. For further details- *www.ncert.nic.in*

**2. BANARAS HINDU UNIVERSITY, VARANASI,** invites applications for the post of Project Fellow in the salary, Contractual Rs. 8000/- P.M. in U.G.C. Sponsered project. Contact- Prof. Kaushalendra Pande, Principal Investigator, Department of Sahitya, Faculty of Sanskrit Vidya Dharma Vigyanan, BHU, Varanasi- 221005.

**3. GURUKULA KANGRI VISHWAVIDYALAYA, HARIDWAR (U.K.),** invites applications for various academic posts latest by 07-02-2011.
Contact- www.gkvharidwar.org

**4. SHREE SANKARACHARYA UNIVERSITY OF SANSKRIT, Kalady, Ernakulam- 683574, Kerala,** invites applications in the prescribed format for various teaching posts latest by 31-01-2011.
Contact -www.ssus.ac.in

**5. DAYALBAGH EDUCATIONAL INSTITUTE,** (Deemed University), Dayalbagh, Agra-282110, invites applications in the prescribed form for teaching posts latest by- 05-02-2011. For details please refer to the Institute Website http://www.dei.ac.in

---

* **WORLD SAMSKRIT BOOK FAIR**
**विश्व-संस्कृत-पुस्तक-मेला**
January 7-10-2011, Bangalore, INDIA
contact-samkritbookfair.org

* 15th **World Sanskrit Conference, New Delhi, India on 5th-10th January 2012** -www.sanskrit.nic.in

* राष्ट्रियसंस्कृतसंस्थान- नवदेहल्लीपक्षत:
**अखिलभारतशास्त्रीयभाषणस्पर्धा**
जनवरी-६,७,८- २०११,बेंगालूरु,
www.sanskrit.nic.in

### विशिष्टा: संस्कृतपत्रिका: पठ्यन्ताम्

१. **सम्भाषणसन्देश:**, अक्षरम्, गिरिनगरम्, बेङ्गालूरु-५६००८५
http://www.sambhashanasandesha.in

२. **अमृतभाषा**, कालिदासपुरम्, हरिपुरम्, मोतिगञ्ज:, बालेश्वर: - ७५६००३
e-mail : amritabhasha@yahoo.com

३. **स्रग्धरा**, ओडिशा संस्कृत अकादमी, टङ्कपाणिरोड्, भुवनेश्वर:
e-mail: orissasanskritacademyb@yahoo.com

### वाग्वर्धिन्या: प्रथमसंख्या मन्त्रिमहोदयाभ्य: समर्पिता



**वाग्वर्धिनी**वृत्तपत्रिकाया: प्रथमसंख्या भारतसर्वकारस्य **मानवसंसाधनविकासराष्ट्रमन्त्रि डॉ. डि.पुरन्देश्वरि**महोदयाभ्य: विद्यापीठपक्षत: समर्पिता । संस्कृतभाषाया: प्रचारार्थं तथा जनसाधारणेषु संस्कृतं प्रति रुचिजागरणार्थं **वाग्वर्धिनीपरिषद:** प्रयासोऽयमभिनन्दनीय: इति तासां शुभकामना ।

---

* **Seminar/Workshop** on **"Job avenues for Sanskrit Students"** under Career Counselling Cell, R.S.Vidyapeetha, Tirupati-517064(A.P)
Contact-0877-2287690, extn.322

* Vidyapeetha Web - www.rsvidyapeeth.ac.in.

---

* **Sastravaridhi Course in Vyakarana**
28th January, 2011 to 26th February, 2011.
**For further details contact:**
**Prof. S.Satyanarayana Murty,**
Head & Project Director, Dept. of Vyakarana, Sansknet Building, R.S.Vidyapeetha, Tirupati.

* **SANSKRIT TEXTS ON WEB-SITES.**
1. http://www.sanskrit.nic.in
2. http://www.sansknet.org
3. http://www.cdacb.in/html/ihg/research devlp.aspx
4. http://ihg.cdacb.in:8080/ihg

---

**प्राप्तेषु**

....................................

....................................

....................................


**सम्पादक: - डॉ. सत्यनारायण आचार्य:**, समायोजक:
**सहसम्पादक: - डॉ. दक्षिणामूर्तिशर्मा**, सहसमायोजक:
मुद्रक: - Students Offset, Tirupati
**वार्तासम्पादिका - श्वेतपद्मा शतपथी**, शोधसहायिका
**प्रकाशक: - प्रो. ए. गुरुमूर्ति:**, कुलसचिव:
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति: (आ. प्र.)



**If undelivered, please return to The Editor ,Vagvardhini, Vagvardhini Parisad, Rashtriya Sanskrit Vidyapeetha (Deemed University), Tirupati- 517064 (A.P.)**